# Aryamanjushrinamashtottarashataka Stotram

# आर्यमञ्जुश्रीनामाष्टोत्तरशतकस्तोत्रम्

## Document Information

Text title : Aryamanjushrinamashtottarashataka Stotram

File name : AryamanjushrInAmAShTottarashatakastotram.itx

Category : misc, buddha, stotra, aShTottarashatanAma

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# आर्यमञ्जुश्रीनामाष्टोत्तरशतकस्तोत्रम्

प्रणिपत्य मुनिं मूर्ध्ना सुप्रसन्नेन चेतसा ।
वक्ष्याम्यद्य च नामानि सम्बुद्धैरनुवर्णितम् ॥ १॥

सुरूपो रूपधारी च सर्वरूपो ह्यनुत्तरः ।
सर्वलक्षणसम्पूर्णो मञ्जुश्रीरुत्तमः श्रिया ॥ २॥

अचिन्त्यश्चिन्त्यविगतोऽचिन्त्योऽद्भुतविक्रमः ।
अचिन्त्यः सर्वधर्माणामचिन्त्यो मनसस्तथा ॥ ३॥

शून्यताभावितात्माकः शून्यधर्मसमन्वितः ।
शून्यस्त्वमधिमुक्तिश्च शून्यत्रिभवदेशकः ॥ ४॥

सर्वज्ञः सर्वदर्शी च सर्वभूमिपतिर्विभुः ।
मञ्जुश्रीवशवर्ती च पद्माक्षः पद्मसम्भवः ॥ ५॥

पद्मकिञ्जल्कवर्णश्च पद्मपर्यङ्कवासनः ।
नीलोत्पलधरः पूतः पवित्रः शान्तमानसः ॥ ६॥

प्रत्येकबुद्धो बुद्धस्त्वमादिबुद्धो निरुच्यसे ।
ऋद्धिमान् वशिताप्राप्तश्चतुःसत्योपदेशकः ॥ ७॥

लोकपालः सहस्राक्ष ईश्वरस्त्वं प्रजापतिः ।
शिवस्त्वं सर्वभूतानां त्वं विभुर्गुणसागरः ॥ ८॥

ऋषिस्त्वं पुण्यः श्रेष्ठश्च ज्येष्ठो जातिस्मरस्तथा ।
विनायको विनेता च जिनपुत्रो जिनात्मजः ॥ ९॥

भानुः सहस्ररश्मिमस्त्वं सोमस्त्वं च बृहस्पतिः ।
धनदो वरुणश्चैव त्वं विष्णुस्त्वं महेश्वरः ॥ १०॥

अनन्तो नागराजस्त्वं स्कन्दः सेनापतिस्तथा ।
वेमचित्रासुरेन्द्रस्त्वं भौमः शुक्रो बुधस्तथा ॥ ११॥

सर्वदेवमयो वीरः सर्वदेवैर्नमस्कृतः ।
लोकधर्ममलातीतस्त्वं लोके चाग्रपुद्गलः ॥ १२॥

लोकज्ञो लोकविज्ञातो ज्ञानिनां प्रवरो वरः ।
वरदो लयनं त्राणमधृष्यो मारकर्मिणाम् ॥ १३॥

गम्भीरश्चानवद्यश्च कल्याणमित्रसम्पदः ।
वैद्यस्त्वं शल्यहर्ता न नरदम्यः सुसारथिः ॥ १४॥

मतिमान् गतिमांश्चैव बुद्धिमांश्च विचक्षणः ।
पुण्यवान् कल्पवृक्षश्च बोध्यङ्गपुष्पमण्डितः ॥ १५॥

विमुक्तिफलसम्पन्न आश्रयः सर्वदेहिनाम् ।
मनोहरो मनोज्ञश्च अनघो ब्रह्मचारिणाम् ॥ १६॥

केतुस्त्वं ग्रहश्रेष्ठश्च ऋषिभिर्मुनिपुङ्गवः ।
युवराज्ञाभिषिक्तस्त्वं दशभूमीश्वरः प्रभुः ॥ १७॥

सार्थवाहो गणश्रेष्ठो निर्वाणोत्तमदेशकः ।
खसमो मध्यकल्पस्त्वं त्वं तेजो वायुरेव च ॥ १८॥

चिन्तामणिस्त्वं सत्त्वानां सर्वाशापरिपूरकः ।
नमोऽस्तु ते महाविद्य सर्वभूतनमस्कृत ॥ १९॥

इति श्रीआर्यमञ्जुश्रीनामाष्टोत्तरशतकस्तोत्रं सम्पूर्णम् ॥

*Aryamanjushrinamashtottarashataka Stotram*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*